चतुर्थीविभक्तिः



ददाति



कः ददाति? | किं ददाति? | कस्मै ददाति?







बालः | पुस्तकम् | मित्राय

बालः मित्राय पुस्तकं ददाति

ददाति



का ददाति?



छात्रा

किं ददाति?



लेखनीम्

कस्मै ददाति?



अग्रजायै

छात्रा अग्रजायै लेखनीं ददाति

यच्छति



कः यच्छति? किं यच्छति? कस्मै यच्छति?







वैद्यः औषधम् अस्वस्थाय

वैद्यः अस्वस्थाय औषधं यच्छति

सम्प्रदानम्



- दानक्रियायाः विषये "कस्मै ददाति" इति प्रश्नस्य उत्तरम्
- कर्मणा यमभिप्रैति स सम्प्रदानम्
- सम्प्रदानवाचकात् चतुर्थीविभक्तिः

चतुर्थीविभक्तिरूपाणि



बालाय	बालाभ्याम्	बालेभ्यः
मित्राय	मित्राभ्याम्	मित्रेभ्यः
बालिकायै	बालिकाभ्याम्	बालिकाभ्यः
नार्यै	नारीभ्याम्	नारीभ्यः

चतुर्थीविभक्ति-एकवचनरूपं वदत

- बालः
- जनकः
- देवः
- मित्रम्
- राष्ट्रम्
- कुटुम्बम्

- बालिका
- महिला
- रमा
- सीता
- गिरिजा
- शाला

- नारी
- गौरी
- गोपी
- नदी
- माधवी
- वाणी

चतुर्थीविभक्ति-एकवचनरूपं वदत

- बालाय
- जनकाय
- देवाय
- मित्राय
- राष्ट्राय
- कुटुम्बाय
- बालिकायै
- महिलायै
- रमायै
- सीतायै
- गिरिजायै
- शालायै
- नार्यै
- गौर्यै
- गोप्यै
- नद्यै
- माधव्यै
- वाण्यै

कस्मै/कस्यै ददाति?



वाक्यरचना (भूतकाले)

- जनक – पुत्र – धन
- अम्बा – पुत्री – वस्त्र
- अध्यापकः – छात्र – पुस्तक
- अध्यापिका – छात्रा – लेखनी
- धनिक – भिक्षुक – धन
- राजा – विप्र - धेनु
- भक्त – देवी – फल
- देवी – भक्त – वर
- दुष्यन्त – शकुन्तला – अङ्गुलीयक
- कुचेल – कृष्ण – पृथुक
- पति – पत्नी – स्वर्णमालिका
- रमा – गौरी - शाटिका

वाक्यरचना (भूतकाले)

- जनकः पुत्राय धनं दत्तवान्।
- अम्बा पुत्र्यै वस्त्रं दत्तवती।
- अध्यापकः छात्राय पुस्तकं दत्तवान्।
- अध्यापिका छात्रायै लेखनीं दत्तवती।
- धनिकः भिक्षुकाय धनं दत्तवान्।
- भक्तः देव्यै फलं दत्तवान्।
- देवी भक्ताय वरं दत्तवती।
- दुष्यन्तः शकुन्तलायै अङ्गुलीयकं दत्तवान्।
- कुचेलः कृष्णाय पृथुकं दत्तवान्।
- पतिः पत्न्यै स्वर्णमालिकां दत्तवान्।

कस्मै किं ददाति?

- बाल (द्वि) – पुस्तक (द्वि)
- मित्र (द्वि) – लेखनी (द्वि)
- पुत्र (द्वि) – अश्व (द्वि)
- छात्र (द्वि) – फल (द्वि)
- वानर (द्वि) – कदली (द्वि)
- गज (द्वि) – माला (द्वि)
- भिक्षुक (बहु) – नाणक (बहु)
- जन (बहु) – वस्त्र (बहु)
- अस्वस्थ (बहु) – गुलिका (बहु)
- पण्डित (बहु) – गृह (बहु)
- कर्मकर (बहु) – जलकूपी (बहु)
- वृद्ध (बहु) – दण्ड (बहु)

कस्मै किं ददाति?

- बालाभ्यां पुस्तके ददाति।
- मित्राभ्यां लेखन्यौ ददाति।
- पुत्राभ्याम् अश्वौ ददाति।
- छात्राभ्यां फले ददाति।
- वानराभ्यां कदल्यौ ददाति।
- गजाभ्यां माले ददाति।
- भिक्षुकेभ्यः नाणकानि ददाति।
- जनेभ्यः वस्त्राणि ददाति।
- अस्वस्थेभ्यः गुलिकाः ददाति।
- पण्डितेभ्यः गृहाणि ददाति।
- कर्मकरेभ्यः जलकूपीः ददाति।



वाक्यरचना (सर्वेषु वचनेषु)
पुष्प
बालिका
फल
तापसी
अग्रजा
शाटिका
लेखनी
सहोदरी
बालकः
अनुजा
पुस्तिका
घट
गोपी
वृद्धा
स्यूत
कर्मकरी
मार्जनी

वाक्यरचना (सर्वेषु वचनेषु)

- बालकः बालिकायै/बालिकाभ्याम्/बालिकाभ्यः पुष्पं ददाति।
- बालकः अग्रजायै/अग्रजाभ्याम्/अग्रजाभ्यः शाटिकां ददाति।
- बालकः अनुजायै/अनुजाभ्याम्/अनुजाभ्यः पुस्तिकां ददाति।
- बालकः वृद्धायै/वृद्धाभ्याम्/वृद्धाभ्यः स्यूतं ददाति।
- बालकः कर्मकर्यै/कर्मकरीभ्याम्/कर्मकरीभ्यः मार्जनीं ददाति।
- बालकः गोप्यै/गोपीभ्याम्/गोपीभ्यः घटं ददाति।
- बालकः सहोदर्यै/सहोदरीभ्याम्/सहोदरीभ्यः लेखनीं ददाति।
- बालकः तापस्यै/तापसीभ्याम्/तापसीभ्यः फलं ददाति।

सर्वनाम्नां चतुर्थीविभक्तिः



तस्मै	ताभ्याम्	तेभ्यः
तस्यै	ताभ्याम्	ताभ्यः
तस्मै	ताभ्याम्	तेभ्यः
एतस्मै	एताभ्याम्	एतेभ्यः
एतस्यै	एताभ्याम्	एताभ्यः
एतस्मै	एताभ्याम्	एतेभ्यः
मह्यम्	आवाभ्याम्	अस्मभ्यम्
तुभ्यम्	युवाभ्याम्	युष्मभ्यम्

वाक्यरचना (सर्वेषु वचनेषु)



वस्त्रम्

सः बालकः

चीराणि त्वं तापसी

सा बालिका शाटिका

पदवी अहं सज्जनः

राजा

तत् मित्रम् हारः

अश्वाः एतत् कुटुम्बम्

एषः विप्रः गृहम्

एषा कर्मकरी

नाणकानि

- राजा तस्मै बालकाय/ताभ्यां बालकाभ्यां/तेभ्यः बालकेभ्यः वस्त्रं दत्तवान्।
- राजा तस्यै बालिकायै/ताभ्यां बालिकाभ्यां/ताभ्यः बालिकाभ्यः शाटिकां दत्तवान्।
- राजा तस्मै मित्राय/ताभ्यां मित्राभ्यां/तेभ्यः मित्रेभ्यः हारं दत्तवान्।
- राजा एतस्मै विप्राय/एताभ्यां विप्राभ्याम्/एतेभ्यः विप्रेभ्यः गृहं दत्तवान्।
- राजा एतस्यै कर्मकर्यै/एताभ्यां कर्मकरीभ्याम्/एताभ्यः कर्मकरीभ्यः नाटकानि दत्तवान्।
- राजा एतस्मै कुटुम्बाय/एताभ्यां कुटुम्बाभ्याम्/एतेभ्यः कुटुम्बेभ्यः अश्वान् दत्तवान्।
- राजा मह्यं सज्जनाय/आवाभ्यां सज्जनाभ्याम्/अस्मभ्यं सज्जनेभ्यः पदवीं दत्तवान्।
- राजा तुभ्यं तापस्यै/युवाभ्यां तापसीभ्याम्/युष्मभ्यं तापसीभ्यः फलं दत्तवान्।

सम्प्रदानम् - २



- रुच्-धातोः प्रयोगे यः सन्तुष्टः तस्य सम्प्रदानसंज्ञा भवति।
- 'रुच्यर्थानां प्रीयमाणः' इति सूत्रम्।
- सम्प्रदानवाचकात् चतुर्थीविभक्तिः



- बालकाय मोदकं रोचते।
- महाराजाय सङ्गीतं रोचते।
- मह्यं संस्कृतं रोचते।
- योधाय अश्वाः रोचन्ते।
- तस्मै विमानानि रोचन्ते।



- बालकः – आम्रफलम्
- बालिका – पुष्पम्
- मित्रम् – पुस्तकानि
- कृष्णः – नवनीतम्
- अम्बा – चलच्चित्रम्
- कलत्रम् - शाटिकाः
- सः – कथाः
- सा – नाटकानि
- एषः – कादम्बरी
- एषा – भाषणम्
- अहम् – व्याकरणम्
- त्वम् - वेदान्तः



- बालकाय आम्रफलं रोचते।
- बालिकायै पुष्पं रोचते।
- मित्राय पुस्तकानि रोचन्ते।
- कृष्णाय नवनीतं रोचते।
- अम्बायै चलच्चित्रं रोचते।
- कलत्राय शाटिकाः रोचन्ते।
- तस्मै कथाः रोचन्ते।
- तस्यै नाटकानि रोचन्ते।
- एतस्मै कादम्बरी रोचते।
- एतस्यै भाषणं रोचते।
- मह्यं व्याकरणम् रोचते।
- तुभ्यं वेदान्तः रोचते।



- बालकः– फलम्
- गोपी – कृष्णः
- देवः – यज्ञः
- महिला – पुष्पाणि
- वानरः - कदलीफलानि
- मित्रम् - सम्भाषणम्
- सः – घृतम्
- एषा – नृत्यम्
- अहम् – वीणावादनम्
- सा – भगवन्नाम
- त्वम् – किम्
- एषः - फलानि



- बालकेभ्यः फलं रोचते।
- गोपीभ्यः कृष्णः रोचते।
- देवेभ्यः यज्ञः रोचते।
- महिलाभ्यः पुष्पाणि रोचन्ते।
- वानरेभ्यः कदलीफलानि रोचन्ते।
- मित्रेभ्यः सम्भाषणं रोचते।
- तेभ्यः घृतं रोचते।
- एताभ्यः नृत्यं रोचते।
- मह्यं वीणावादनं रोचते।
- तस्यै भगवन्नाम रोचते।
- तुभ्यं किं रोचते?
- एतस्मै फलानि रोचन्ते।



- रामः – असत्यम्
- अर्जुनः – युद्धम्
- गिरिजा – गङ्गा
- देवाः – असुराः
- असुराः – सत्कार्याणि
- नारायणः - अधर्मः
- ते – हिंसा
- वयम् – आलस्यम्
- सा – प्रेतकथाः
- एताः – शाकानि
- त्वम् – एते
- एषः - अहम्



- रामाय असत्यं न रोचते।
- अर्जुनाय युद्धं न रोचते।
- गिरिजायै गङ्गा न रोचते।
- देवेभ्यः असुराः न रोचन्ते।
- असुरेभ्यः सत्कार्याणि न रोचन्ते।
- नारायणाय अधर्मः न रोचते।
- तस्मै हिंसा न रोचते।
- अस्मभ्यम् आलस्यं न रोचते।
- तस्यै प्रेतकथाः न रोचन्ते।
- एताभ्यः शाकानि न रोचन्ते।
- तुभ्यम् एते न रोचन्ते।
- एतस्मै अहं न रोचे।

सम्प्रदानम् - ३



- रावणः **रामाय** क्रुध्यति
- दुर्योधनः **पाण्डवेभ्यः** द्रुह्यति
- सत्यभामा **रुक्मिण्यै** ईर्ष्यति
- शिशुपालः **कृष्णाय** असूयति

सम्प्रदानम् - ३



- क्रुधादीनां प्रयोगे कोपपात्रस्य सम्प्रदानसंज्ञा भवति।
- क्रोधः – अमर्षः
- द्रोहः – अपकारः
- ईर्ष्या – अक्षमा
- असूया – गुणेषु दोषाविष्करणम्



सुरेशः → क्रुध् → गोविन्दः → द्रुह् → शङ्करः → ईर्ष्य् → महेशः

महेशः → असूय् → गिरिजा → ईर्ष्य् → माधवी

माधवी → क्रुध् → मोहनः → असूय् → वाणी → द्रुह् → रमा → क्रुध् → रमेशः

रमेशः → असूय् → गङ्गा → द्रुह् → गायत्री → ईर्ष्य् → आनन्दः



- सुरेशः गोविन्दाय क्रुध्यति।
- गोविन्दः शङ्कराय द्रुह्यति।
- शङ्करः महेशाय ईर्ष्यति।
- महेशः गिरिजायै असूयति।
- गिरिजा माधव्यै ईर्ष्यति।
- माधवी मोहनाय क्रुध्यति।
- मोहनः वाण्यै असूयति।
- वाणी रमायै द्रुह्यति।
- रमा रमेशाय क्रुध्यति।
- रमेशः गङ्गायै असूयति।
- गङ्गा गायत्र्यै द्रुह्यति।
- गायत्री आनन्दाय ईर्ष्यति।

उपपदचतुर्थी - नमः



- रामाय नमः।
- हरये नमः।
- गुरवे नमः।

अभ्यासः – ६ (नमः)



- श्रीरामः
- रामभद्रः
- रामचन्द्रः
- रघुनाथः
- सीताकान्तः
- हनुमत्प्रियः

- रमा
- ललिता
- गङ्गा
- गिरिजा
- दुर्गा
- सीता

- सरस्वती
- पार्वती
- वाणी
- लक्ष्मीः
- गौरी
- काली

- देवाः
- देव्यः
- ब्राह्मणाः
- सज्जनाः
- ऋषिवराः
- शास्त्रकाराः

- श्रीरामाय
- रामभद्राय
- रामचन्द्राय
- रघुनाथाय
- सीताकान्ताय

- रमायै
- ललितायै
- गङ्गायै
- गिरिजायै
- दुर्गायै
- सीतायै

- सरस्वत्यै
- पार्वत्यै
- वाण्यै
- लक्ष्म्यै
- गौर्यै
- काल्यै

- देवेभ्यः
- देवीभ्यः
- ब्राह्मणेभ्यः
- सज्जनेभ्यः
- ऋषिवरेभ्यः
- शास्त्रकारेभ्यः

उपपदचतुर्थी – कल्पते/जायते/भवति



- भक्तिः ज्ञानाय कल्पते।
- व्यायामः आरोग्याय कल्पते।
- हिंसा पापाय भवति।
- दुर्व्यवहारः दुःखाय भवति।



- अभ्यासः – प्रावीण्यम्
- परोपकारः – पुण्यम्
- परपीडनम् – पापम्
- यौवनम् – गर्वः
- प्रभुत्वम् – अविवेकः
- सम्पत्तिः – अहङ्कारः

- विद्या – विवादः
- धनम् – मदः
- शक्तिः – परपीडनम्
- विद्या – ज्ञानम्
- धनम् – दानम्
- शक्तिः - रक्षणम्



- अभ्यासः प्रावीण्याय कल्पते।
- परोपकारः पुण्याय भवति।
- परपीडनं पापाय कल्पते।
- यौवनम् गर्वाय भवति।
- प्रभुत्वम् अविवेकाय कल्पते।
- सम्पत्तिः अहङ्काराय भवति।
- विद्या विवादाय कल्पते।
- धनं मदाय कल्पते।
- शक्तिः परपीडनाय कल्पते।
- विद्या ज्ञानाय भवति।
- धनं दानाय भवति।
- शक्तिः रक्षणाय भवति।

उपपदचतुर्थी – अन्यानि पदानि



- स्वस्ति
- स्वाहा
- स्वधा
- वषट्
- सुखम्
- हितम्

गत्यर्थक-कर्मपदात् चतुर्थी



- सः गृहं गच्छति – सः गृहाय गच्छति।
- बालिका शालां याति – बालिका शालायै याति।
- रामः वनं व्रजति – रामः वनाय व्रजति।



देवालयः

सभा

यज्ञशाला

गच्छति

अटवी

नदी

मन्दिरम्

गृहम्

ग्रामः



- देवालयं/देवालयाय गच्छति।
- यज्ञशालां/यज्ञशालायै गच्छति।
- नदीं/नद्यै गच्छति।
- गृहं/गृहाय गच्छति।
- ग्रामं/ग्रामाय गच्छति।
- मन्दिरं/मन्दिराय गच्छति।
- अटवीम्/अटव्यै गच्छति।
- सभां/सभायै गच्छति।

तुमुनः कर्मपदात् चतुर्थी



- बालकः फलानि क्रेतुं दश रूप्यकाणि ददाति।
- बालकः फलेभ्यः दश रूप्यकाणि ददाति।



- गोविन्दः पुस्तकानि क्रेतुम् आपणं गच्छति।
- बालकः पाठं पठितुं शालां गच्छति।
- प्रेक्षकाः सङ्गीतं श्रोतुं कलामन्दिरं गच्छन्ति।
- मक्षिकाः मकरन्दं पातुं पुष्पाणि अन्विष्यन्ति।
- वटुः भिक्षां याचितुं गृहात् गृहम् अटति।
- कृषिकाः सस्यानि वर्धयितुं श्रमं वहन्ति।



- गोविन्दः पुस्तकेभ्यः आपणं गच्छति।
- बालकः पाठाय शालां गच्छति।
- प्रेक्षकाः सङ्गीताय कलामन्दिरं गच्छन्ति।
- मक्षिकाः मकरन्दाय पुष्पाणि अन्विष्यन्ति।
- वटुः भिक्षायै गृहात् गृहम् अटति।
- कृषिकाः सस्येभ्यः श्रमं वहन्ति।

तादर्थ्ये चतुर्थी



- प्रकृति-विकृतिभावः
  - यूपाय दारु।
  - कुण्डलाय हिरण्यम्।
- उपकार्य-उपकारकभावः
  - भिक्षुकाय अन्नम्।
  - विप्राय गौः।



- नूपुरे – रजतम्
- द्वारम् – काष्ठम्
- घृतम् – नवनीतम्
- घटाः - मृत्तिका
- बाणाः – अयः
- ऊरुकम् - वस्त्रम्
- बालाः – वस्त्राणि
- याचकाः – भोजनम्
- योधः – आयुधम्
- कृषिकाः – साहाय्यधनम्
- दरिद्राः – गृहाणि
- अम्बा - शाटिका



- नूपुराभ्यां रजतम्
- द्वाराय काष्ठम्
- घृतताय नवनीतम्
- घटेभ्यः मृत्तिका
- बाणेभ्यः अयः
- ऊरुकाय वस्त्रम्
- बालेभ्यः वस्त्राणि
- याचचकेभ्यः भोजनम्
- योधाय आयुधम्
- कृषिकेभ्यः साहाय्यधनम्
- दरिद्रेभ्यः गृहाणि
- अम्बायै शाटिका

संस्कृतं भारतम्

चतुर्थी विभक्तिः

स्वाहा योगे	अग्नये स्वाहा
स्वस्ति योगे	प्रजाभ्यः स्वस्ति
नमः योगे	शंकराय नमः
स्पृह् योगे	माला पुष्पेभ्यः स्पृह्यति
असूया योगे	दुर्जनः सज्जनाय असूयति
ईर्ष्या योगे	कान्ता शान्तायै ईर्ष्यति
द्रुह् धातु योगे	रावणः रामाय द्रुह्यति
सम्प्रदानकारके	धनिकः याचकाय धनं यच्छति
रुच् धातुयोगे	मह्यं दुग्धं रोचते
स्वद् धातुयोगे	तुभ्यं तक्रं स्वदते
दानार्थे	ब्राह्मणाय धनं ददाति
अलं योगे	रामः रावणाय अलम्
धृ णिच् योगे	सः मह्यं शतं धारयति
क्रुध् धातुयोगे	पिता पुत्राय क्रुध्यति
कुप् धातुयोगे	अध्यापकः छात्राय कुप्यति

विभक्तिवल्लरी

प्रथमा

द्वितीया

तृतीया

चतुर्थी

पञ्चमी

षष्ठी

सप्तमी

सम्बोधनप्रथमा

चतुर्थी

I. १. यत्र **दानक्रिया** अस्ति तत्र, यस्मै वयं किमपि दद्मः तस्य चतुर्थीविभक्तिः भवति ।

उदा – बलिः वामनाय भूमिं दत्तवान् ।

अभ्यासः – 'रामः कस्मै किं दत्तवान्' इति अधस्तनकोष्टकस्य साहाय्येन लिखत ।

	पुत्रः	युतकवस्त्रम्	
	पुत्री	शाटिका	
	मित्रं	पुस्तकानि	
रामः	पत्नी	धनम्	दत्तवान्
	कर्मकरी	वेतनम्	
	सेविका	उपायनम्	
	भगिनी	कण्ठहारम्	

१. रामः पुत्राय युतकवस्त्रं दत्तवान् ।

ii. रमा केभ्यः किं दत्तवती इति लिखत ।


रमा	भिक्षुकाः सख्यः सर्वे ते महिलाः बान्धवाः	नाणकानि मधुरम् पानीयम् उपाहारम् फलम् ताम्बूलम्	दत्तवती

१. रमा भिक्षुकेभ्यः नाणकानि दत्तवती ।

II. रोचते इति यत्र प्रयोगः तत्र यस्मै रोचते तस्य चतुर्थीविभक्तिः भवति ।
(यत् रोचते तस्य तु प्रथमाविभक्तिः एव)

उदा - रामाय मधुरं रोचते ।

अधस्तनचित्रस्य साहाय्येन किं कस्मै रोचते/न रोचते इति लिखत ।



१
२
३
४
५
६
७
८
९
१०
११
१२
१३
१४
१५
१६
रोचते
न रोचते
रोचते
न रोचते
न रोचते
रोचते
रोचते
न रोचते
रोचते
न रोचते
रोचते
रोचते
न रोचते
रोचते
न रोचते
न रोचते
पण्डितः
पामरः
रामः
भगिनी
सीता
नलिनी
कृष्णः
भीमः
पुत्री
पुत्रः
चन्द्रः
सूर्यः
ग्रामीणः
नागरिकः
छात्रः
अध्यापकः
वादः
कार्यम्
पठनम्
लेखनम्
पाकः
रोटिका
चित्रम्
कलहः

III. **नमः** इत्यस्य शब्दस्य योगः यत्र तस्य शब्दस्य चतुर्थी भवति ।

उदा - देवाय नमः ।

(विशेषः - 'नमस्करोमि' इति क्रियापदस्य प्रयोगः कृतः चेत् तु द्वितीया एव । यथा - अहं देवं नमस्करोमि ।)


अभ्यासः - *के कस्मै नमः इति वदन्ति इति निर्दिशत ।*

१. रामभक्ताः	रा	मा	य			नमः इति वदन्ति ।
२. शिवभक्ताः						नमः " " ।
३. दुर्गाभक्ताः						नमः " " ।
४. देवीभक्ताः						नमः " " ।
५. आञ्जनेयभक्ताः						नमः " " ।
६. कृष्णभक्ताः						नमः इति वदन्ति ।

IV. क्रुध्यति (कुप्यति) असूयति, ईर्ष्यति, द्रुह्यति - इत्येतेषां धातूनां प्रयोगः यत्र क्रियते तत्र क्रोधादीनां पात्रस्य चतुर्थी भवति ।

उदा - रावणः रामाय क्रुध्यति/द्रुह्यति/ईर्ष्यति ..... ।

अभ्यासः - *अधः चत्वारः निर्दिष्टाः सन्ति । कः कं प्रति किं करोति इति बाणचिह्नेन सूचितम् अस्ति । तदाधारेण वाक्यानि रचयत ।*



१. रामः राकेशाय क्रुध्यति ।

V. **कल्पते** इत्यस्य योगे चतुर्थी भवति । (कल्पते इत्यर्थे भूधातोः (भवति) प्रयोगः अपि कर्तुं शक्यः ।)

उदा - भक्तिः ज्ञानाय कल्पते/भवति ।
(भक्तिः ज्ञानोत्पादने समर्था भवति इत्यर्थः ।)

अभ्यासः - *आवरणे दत्तस्य पदस्य उचितेन चतुर्थीविभक्त्यन्तरूपेण रिक्तानि स्थलानि पूरयत ।*

यथा - एवं कथनं तस्य .... भवेत् । (खेदः)
एवं कथनं तस्य खेदाय भवेत् ।

१. एतत् कार्यम् अतीव .... भवति । (कष्टम्)

२. प्रतिदिनं प्रातः उत्थानं .... भवति । (आरोग्यम्)

३. संस्कृतभाषा .... भवति । (राष्ट्रैक्यम्)

४. चर्चा .... मा भवतु । (विवादः)

५. दुर्व्यसनं कदापि .... न भवति । (सुखम्)

६. अद्य तस्य पाठनं .... अभवत् । (शिरोवेदना)

७. गुरूणां उपदेशस्य श्रवणं .... भवति (हितम्)

८. एषः उपायः भवतः .... भवति वा न वा ? (तृप्तिः)

९. दुर्जनस्य धनसम्पादनं .... भवति । (मदः)

१०. अप्रियवचनं कस्य वा .... भवेत् ? (सन्तोषः)

VI. *कृष्णः एकस्मै किञ्चित् दर्शयति, अन्यस्मै अन्यत् दर्शयति । सः कस्मै किं दर्शयति इति अधः निर्दिष्टम् अस्ति । तदाधारेण सर्वनामशब्दानां चतुर्थीविभक्तिं योजयन्तः वाक्यानि रचयत ।*

१. सः - चित्रम्	एषः - पत्रिकाम्
२. सा - शाटिका	एषा - कण्ठहारः
३. भवान् - ग्रामः	भवती - नगरम्
४. एते - यक्षगानम्	ते - चलनचित्रम्
५. एताः - नृत्यम्	ताः - नाटकम्
६. भवन्तः - विद्यालयः	भवत्यः - कार्यालयः
७. अहम् - चित्रकथापुस्तकम्	वयम् - क्रीडनकानि

अधोनिर्दिष्टं कोष्टकं पठत ।

	चतुर्थ्यन्तानि रूपाणि		
	पुं.	स्त्री.	नपुं.
इकारान्तः	हरये हरिभ्यः	मत्यै मतिभ्यः	दध्ने दधिभ्यः
उकारान्तः	गुरवे गुरुभ्यः	धेनवे धेनुभ्यः	मधुने मधुभ्यः
ऋकारान्तः	पित्रे पितृभ्यः	मात्रे मातृभ्यः	....
ऋकारान्तः	कर्त्रे कर्तृभ्यः	....	....

VII. *अधोनिर्दिष्टानां चतुर्थीविभक्तिरूपाणि लिखत ।*

	ए.व.	*ब.व.*
उदा – शम्भुः	शम्भवे	शम्भुभ्यः

	ए.व.	ब.व.
१. कविः (पुं.)	....	....
२. बन्धुः (पुं.)	....	....

३. अवधिः (पुं.) ....

४. भ्राता (पुं.) ....

५. वक्ता (पुं.) ....

६. सुमतिः (स्त्री.) ....

७. अभिरुचिः (स्त्री.) ....

८. परशुः (पुं.) ....

९. याता (स्त्री.) ....

१०. सूक्तिः (स्त्री) ....

VIII. *आवरणे दत्तानां शब्दानां चतुर्थ्यन्तेन रूपेण (ए.व.) रिक्तस्थलं पूरयत ।*

उदा – <u>मुरारये</u> (मुरारिः) नमः ।

१. .... (शनिः) नमः ।

२. .... (राहुः) नमः ।

३. .... (केतुः) नमः ।

४. .... (सविता (पुं.)) नमः ।

५. .... (धेनुः) तृणं रोचते ।

६. .... (माता) पूजाविधिः रोचते ।

७. .... (वसुमतिः) नर्तनं रोचते ।

८. .... (दुहिता (स्त्री.) शिशुपालनं रोचते ।

IX. *आवरणे दत्तानां शब्दानां चतुर्थीबहुवचनान्तेन रूपेण रिक्तस्थानानि पूरयत ।*

उदा - प्राध्यापकः वक्तृभ्यः (वक्तृ) गौरवधनं दत्तवान् ।

१. राघवः .... (अतिथि) स्मरणिकां दत्तवान् ।

२. अर्चकः .... (सेवाकर्तृ) प्रसादं दत्तवान् ।

३. शिष्यः .... (गुरु) पाद्यं दत्तवान् ।

४. पिता .... (दुहितृ) धनं दत्तवान् ।

५. राजा .... (शत्रु) दण्डनं दत्तवान् ।

६. पुत्राः .... (मातृ) सुवर्णहारं दत्तवन्तः ।

